संस्कृतवार्ता:

दिनाङ्क :-18.09.2025

प्रात: - 06:55

## प्रधानमन्त्री-मध्य प्रदेश-

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्य: मध्यप्रदेशस्य धार-जनपदात् ‘‘स्वस्थ-नारी–सशक्त-परिवाराभियानस्य सहैव अष्टमस्य राष्ट्रियपोषण-मासस्य च शुभारम्भः कृतः। तेन राज्ये आदि-सेवा-पर्वणः अपि उद्घाटनं कृतम् सहैव धार-जनपदस्य भैंसोला-ग्रामे भारतस्य प्रथम-पी.एम्.-मित्र-पार्क इत्यस्य आधारशिला संस्थापिता।

अवसरेऽस्मिन् भाषमाणः श्रीनरेन्द्रमोदी प्रावोचत् यत् विश्वकर्मा-जयन्त्यवसरे भारतस्य महत्तमस्य एकीकृत-वस्त्र-केन्द्रस्य उद्घाटनं क्रियते । प्रधानमन्त्री आग्रहम् अकरोत् यत् आगामिषु उत्सवेषु क्रयणं सर्वं भारतीय वस्तूनामेव करणीयम् । सः व्यापारिभ्यः उक्तवान् यत् ते , तेषां विक्रयणं सर्वं भारतीय-मूलस्य अस्ति इति सुनिश्चितं कुर्वन्तु।

## अमितशाह्-बिहार-भ्रमणम्

भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य बिहारस्य रोहतास, बेगुसराय इत्यादिषु जनपदेषु दलस्य कार्यकर्तृभिः सह मेलनं करिष्यति। सः गतरात्रौ पटना-नगरं सम्प्राप्तवान्। विमानस्थानके केन्द्रीय-गृह-राज्यमन्त्री नित्यानन्द-रायः, भाजपेति दलस्य राज्य-अध्यक्षः डा. दिलीप-जायसवालः, उपमुख्यमन्त्री सम्राट्-चौधरी, विजयकुमार-सिन्हा, अनेके वरिष्ठा: नेतारः च तस्य स्वागतम् कृतवन्तः।

## रक्षामंत्री राजनाथसिंहः

रक्षामंत्री राजनाथसिंहः अद्य नवदिल्ल्यां द्वि-दिवसीयस्य राष्ट्रिय-सम्मेलनस्य, मन्थन- पञ्च विंशत्यधिक द्विसहस्रेत्यस्य उद्घाटनम् करिष्यति। सम्मेलनमिदं रक्षा संपदा महानिदेशालयेन सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षस्य विकसित-भारताय रणनीतिनां प्रमुख विषयेषु आयोजनं क्रियते। एतत् रक्षा-भूमि-प्रबन्धनस्य पुनर्कल्पनायां, उन्नत-डिजिटल्-उपकरणानां तथा प्रौद्योगिकीनां उपयोगे तथा शासकीय-संरचनानां सुदृढीकरणे सुस्थिरतायां च रक्षा-संपदा-विभागस्य भूमिकायां केन्द्रितम् भविष्यति।

## पन्जाब् जितेन्द्रसिंहः

प्रधानमन्त्री कार्यालये केन्द्रीय-राज्यमन्त्री जितेन्द्रसिंहः, जलप्लावित-पञ्जाब्-राज्ये स्थितिः पुनः सामान्यं कर्तुं पुनर्वसनस्य, पुनःस्थापनस्य च प्रयत्नानां कृते केन्द्रतः पूर्णसमर्थनस्य आश्वासनं प्रदत्तवान् । पठानकोट्-जनपदस्य सीमाक्षेत्रस्य जलप्लावितक्षेत्राणां भ्रमणकाले वार्ताहरैः सह वार्तालापं कुर्वन् डा. सिंहः अवदत् यत् प्रधानमन्त्रिणा स्थित्यां चिन्ता प्रकटितास्ति।

## छत्तीसगढ-माओवादिनः मारिताः

छत्तीसगढ-राज्यस्य बीजापुर-जनपदे सुरक्षाबलैः सह जाते संघर्षे द्वौ माओवादिनौ मृतौ। मण्डलस्य दक्षिण-पश्चिम भागे बहुसङ्ख्यां माओवादिनां उपस्थितेः गुप्तसूचनायाः अनन्तरं, ह्यः संघर्षः अभवत्, तदनन्तरं अन्वेषणकार्यम् आरब्धम्। अधुनापर्यन्तं स्थलात् द्वौ माओवादिनौ: शवौ प्राप्तौ स्तः। सङ्घर्षकाले मण्डल-रिजर्व्-गार्ड् इत्यस्य द्वौ सैनिकौ व्रणितौ। तयोः स्थितिः सङ्कटात् बहिः अस्तीति उच्यते। अत्रान्तरे छत्तीसगढस्य नारायणपुरमण्डले द्वादश माओवादिनः आत्मसमर्पणं कृतवन्तः। तत्रैव सुकमा-मण्डले सुरक्षाबलेन चत्वारः माओवादिनः निगडिताः।

## नीरज-चोपड़ा

भारतस्य कुन्तक-प्रक्षेपकः नीरज-चोपड़ा इत्येषः ह्य: चतुरशीति-दशमलव-पञ्चाशीतिः मिटरमितं कुन्तक-प्रक्षेपण-पुरस्सरं पञ्चविंशत्यधिक-द्वि-सहस्रतमायां विश्व-एथलेटिक्स-प्रतिस्पर्धायां पुरुषवर्गस्य निर्णायक-द्वन्दे प्रविष्टवान् ।